# Shri Svayambhagavattvashtakam

# શ્રીસ્વયંભગવત્ત્વાષ્ટકમ્

## Document Information

Text title : svayaMbhagavattvAShTakam

File name : svayaMbhagavattvAShTakam.itx

Category : vishhnu, krishna, aShTaka, vishvanAthachakravartina, stavAmRRitalaharI

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# Shri Svayambhagavattvashtakam

# શ્રીસ્વયંભગવત્ત્વાષ્ટકમ્

સ્વજન્મન્યૈશ્વર્યં બલમિહ વધે દૈત્યવિતતે-
    ર્યશઃ પાર્થત્રાણે યદુપુરિ મહાસમ્પદમધાત્ ।
પરં જ્ઞાનં જિષ્ણૌ મુષલમનુ વૈરાગ્યમનુ યો
    ભગૈઃ ષડ્ભિઃ પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૧॥

ચતુર્બાહુત્વં યઃ સ્વજનિ સમયે યો મૃદશને
    જગત્કોટીં કુક્ષ્યન્તરપરિમિતત્વં સ્વવપુષઃ ।
દધિસ્ફોટે બ્રહ્મણ્યતનુત પરાનન્તતનુતાં
    મહૈશ્વર્યઃ પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૨॥

બલં બક્યાં દન્તચ્છદનવરયોઃ કેશિનિ નૃગે
    નિરૂપે બાહ્વોરઙ્ઘ્રેઃ ફણિનિ વપુષઃ કંસમરુતોઃ ।
ગિરિત્રે દૈત્યેષ્વપ્યતનુત નિજાસ્ત્રસ્ય યદતો
    મહૌજોભિઃ પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૩॥

અસઙ્ખ્યાતો ગોપ્યો વ્રજભુવિ મહિષ્યો યદુપુરે
    સુતાઃ પ્રદ્યુમ્નાદ્યાઃ સુરતરુસુધર્માદિ ચ ધનમ્ ।
બહિર્દ્વારિ બ્રહ્માદ્યપિ બલિવહં સ્તૌતિ યદતઃ
    શ્રિયાં પૂરૈઃ પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૪॥

યતો દત્તે મુક્તિં રિપુવિતતયે યન્ નરજનિ-
    ર્વિજેતા રુદ્રાદેરપિ નતજનાધીન ઇતિ યત્ ।
સભાયાં દ્રૌપદ્યા વરકૃદતિપૂજ્યો નૃપમખે
    યશોભિસ્તત્પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૫॥

ન્યધાદ્ગીતારત્નં ત્રિજગદતુલં યત્પ્રિયસખે
    પરં તત્ત્વં પ્રેમ્ણોદ્ધવપરમભક્તે ચ નિગમમ્ ।
નિજપ્રાણપ્રેષ્ઠાસ્વપિ રસભૃતં ગોપકુલજા-
    સ્વતો જ્ઞાનૈઃ પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૬॥

કૃતાગસ્કં વ્યાધં સતનુમપિ વૈકુણ્ઠમનયન્
    મમત્વસ્યૈકાગ્રાનપિ પરિજનાન્ હન્ત વિજહૌ ।
યદ્યપ્યેતે શ્રુત્યા ધ્રુવતનુતયોક્તાસ્તદપિ હા
    સ્વવૈરાગ્યૈઃ પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૭॥

અજત્વં જન્મિત્વં રતિરરતિતેહારહિતતા
    સલીલત્વં વ્યાપ્તિઃ પરિમિતિરહંતામમતયોઃ ।
પદે ત્યાગાત્યાગાવુભયમપિ નિત્યં સદુરરી
    કરોતીશઃ પૂર્ણઃ સ ભવતુ મુદે નન્દતનયઃ ॥ ૮॥

સમુદ્યત્સન્દેહજ્વરશતહરં ભેષજવરં
    જનો યઃ સેવેત પ્રથિતભગવત્ત્વાષ્ટકમિદમ્ ।
તદૈશ્વર્યસ્વાદૈઃ સ્વધિયમતિવેલં સરસયન્
    લભેતાસૌ તસ્ય પ્રિયપરિજનાનુગ્યપદવીમ્ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
        શ્રીશ્રીસ્વયંભગવત્ત્વાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Svayambhagavattvashtakam*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*